# 32 - द्वात्रिंश दशकम्

## मत्स्य अवतारम्

पुरा हयग्रीव महासुरेण षष्ठान्तरान्तोद्य दकाण्ड कल्पे ।
निद्रोन् मुख ब्रह्ममुखात् हृतेषु वेदेष्वधित्स: किल मत्स्यरूपम् ॥ ॥32-1॥

सत्यव्रतस्य द्रमिलाधि भर्तु: नदी जले तर्पयतस् तदानीम् ।
कराञ्जलौ सञ्ज्वलि ताकृतिस् त्वं अदृश्यथा: कश्चन बाल मीन: ॥ ॥32-2॥

क्षिप्तं जले त्वां चकितं विलोक्य निन्येऽम्बु पात्रेण मुनिस् स्वगेहम् ।
स्वल्पै रहोभि: कलशीं च कूपं वापीं सरश् चानशिषे विभो त्वम् ॥ ॥32-3॥

योग प्रभावात् भव दाज्ञ यैव नीतस् ततस् त्वम् मुनिना पयोधिम् ।
पृष्टोऽमुना कल्प दिदृक्षु मेनं सप्ताह मास्वेति वदन्नयासी: ॥ ॥32-4॥

प्राप्ते त्वदुक्तेऽहनि वारि धारा परिप्लुते भूमितले मुनीन्द्र: ।
सप्तर्षिभिस् सार्ध मपार वारिणि उद्घूर्णमानश् शरणं ययौ त्वाम् ॥ ॥32-5॥

धरां त्व दादेश करी मवाप्तां नौ रूपिणी मारु रुहुस् तदा ते
तत्कम्प कम्प्रेषु च तेषु भूय: त्व मम्बुधे राविरभूर् महीयान् ॥ ॥32-6॥

झषाकृतिं योजन लक्ष दीर्घां दधान मुच्चैस्तर तेजसं त्वाम् ।
निरीक्ष्य तुष्टा मुनयस् त्व दुक्त्या त्वत्तुङ्ग शृङ्गे तरणिं बबन्धु: ॥ ॥32-7॥

आकृष्ट नौको मुनि मण्डलाय प्रदर्शयन् विश्व जगत् विभागान् ।
संस्तूयमानो नृवरेण तेन ज्ञानं परं चोपदिशन् नचारी: ॥ ॥32-8॥

कल्पा वधौ सप्त मुनीन् पुरोवत् प्रस्थाप्य सत्यव्रत भूमिपं तम् ।
वैवस्वताख्यं मनु मादधानः क्रोधाद् हयग्रीव मभि द्रुतोऽभूः ॥॥32-9॥

स्व तुङ्ग श‍ृङ्ग क्षत वक्षसं तं निपात्य दैत्यं निगमान् गृहीत्वा ।
विरिञ्चये प्रीत हृदे ददानः प्रभञ्ज नागार पते प्रपायाः ॥ ॥32-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥